योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः २७

सप्तविंशः सर्गः २७

श्रीवसिष्ठ उवाच ।

सुरासुरसभाज्येष्ठे तस्मिन्भृगुसुते गते ।

मनसा चिन्तयामास बलिर्बुद्धिमतां वरः ।। १

युक्तमुक्तं भगवता चिदेवेदं जगत्त्रयम् ।

चिदहं चिदिमे लोकाश्चिदाशाश्चिदियं क्रिया ।। २

सबाह्याभ्यन्तरं सर्वं चिदेव परमार्थतः ।

अस्ति चिद्व्यतिरेकेण नेह किंचन कुत्रचित् ।। ३

अयमादित्य इत्यर्को न चिता यदि चेत्यते ।

तदर्कतमसोर्भेदः क इहेवोपलभ्यते ।। ४

इयं भूरिति भूरेषा चिता यदि न चेत्यते ।

भूमेः किं नाम भूमित्वं तद्भव्ये भव्यतां गतम् ।। ५

इमा दिशो दिश इति चेत्यन्ते न चिता यदि ।

तत्किं नाम दिशां दिक्त्वं शैलानां चापि काद्रिता ।। ६

इदं जगज्जगदिति चिता यदि न चेत्यते ।

तत्किं जगत्त्वं जगतो नभस्त्वं नभसोऽथ किम् ।। ७

कायोऽयं पर्वताकारश्चिता यदि न चेत्यते ।

तत्किं नाम शरीरत्वं शरीरस्य शरीरिणाम् ।। ८

चिदिन्द्रियाणि चित्कायश्चिन्मनश्चित्तदेषणा ।

चिदन्तश्चिद्बहिश्चित्खं चिद्भावाश्चिद्भवस्थितिः ।। ९

चितैवैनमहं सर्वं स्पर्शनैषणपूर्वकम् ।

करोमि मात्रासंस्पर्शं शरीरेण न किंचन ।। १०

किमनेन शरीरेण काष्ठलोष्टसमेन मे ।

अशेषजगदेकात्मा चिदहं चेतनात्मकः ।। ११

अहं चिदम्बरे भानावहं चिद्भूतपञ्जरे ।

सुरासुरेषु चिदहं स्थावरेषु चरेषु च ।। १२

चिदस्तीह द्वितीया हि कल्पनैव न विद्यते ।

द्वित्वस्यासंभवाल्लोके कः शत्रुः कश्च वा सुहृत् ।। १३

बलिनाम्नः शरीरस्य च्छिन्ने शिरसि भासुरे ।

चितः किं तद्भवेच्छिन्नं सर्वलोकावपूरणात् ।। १४

चिता संचेतितो द्वेषो द्वेषो भवति नान्यथा ।

तस्माद्द्वेषादयः सर्वे भावाभावाश्चिदात्मकाः ।। १५

न चितो व्यतिरेकेण प्रविचार्यापि किंचन ।

आसाद्यते किल स्फारादस्मात्त्रिभुवनोदरात् ।। १६

न द्वेषोऽस्ति न रागोऽस्ति न मनो नास्य वृत्तयः ।

चिन्मात्रस्यातिशुद्धस्य विकल्पकलना कुतः ।। १७

चिदहं सर्वगो व्यापी नित्यानन्दमयात्मकः ।

विकल्पकलनातीतो द्वितीयांशविवर्जितः ।। १८

चितश्चिदिति यन्नाम निर्नामाया न नाम तत् ।

शब्दात्मिकैषा चिच्छक्तिः परिस्फुरति सर्वगा ।। १९

दृश्यदर्शननिर्मुक्तकेवलामलरूपवान् ।

नित्योदितो निराभासो द्रष्टास्मि परमेश्वरः ।। २०

कल्पनाविकलाकारः कालकान्तकलामयः ।

आभासमात्रमुदितो नित्याभासविवर्जितः ।। २१

भारूपैकस्वरूपेऽस्मिन्स्वरूपेण जयाम्यहम् ।

चेत्यरञ्जनरिक्ताय विमुक्ताय महात्मने ।। २२

प्रत्यक्चेतनरूपाय स्वरूपाय नमोऽस्तु ते ।

चितये चेत्यमुक्ताय युक्त्या युक्ताय योग्यया ।। २३

सर्वावभासदीपाय मह्यमेव नमोऽस्तु ते ।

चेत्यनिर्मुक्तचिद्रूपं विष्वग्विश्वावपूरकम् ।। २४

संशान्तसर्वसंवेद्यं सच्चिन्मात्रमहं महत् ।

आकाशवदनन्तोऽहमप्यणोरणुराततः ।। २५

नासादयन्ति मामेताः सुखदुःखदशा दृशः ।

संवेदनमसंवेद्यमचेत्यं चेतनं ततम् ।। २६

न शक्ता मां परिच्छेत्तुं भावाभावा जगद्गताः ।

अथ चैते जगद्भावाः परिच्छिन्दन्तु मामिमम् ।। २७

यथाभिमतमेवैते मत्तो न व्यतिरेकिणः ।

यदि स्वभावभूतेन वस्तुना वस्तु नीयते ।। २८

ह्रियते दीयते वापि तत्किं कस्य किल क्षतम् ।

सर्वदा सर्वमेवाहं सर्वकृत्सर्वसंगतः ।। २९

चेत्यमस्म्यहमेवैतन्न किंचिदपि चोदितम् ।

किं संकल्पविकल्पाभ्यां चितं चिदियमेकिका ।। ३०

संक्षोभयाम्यहं तावच्छाम्याम्यात्मनि पावने ।

इति संचिन्तयन्नेव बलिः परमकोविदः ।। ३१

ओंकारादर्धमात्रार्थं भावयन्मौनमास्थितः ।

संशान्तसर्वसंकल्पः प्रशान्तकलनागणः ।। ३२

निःशङ्कमपि दूरास्तचेत्यचिन्तकचिन्तनः ।

ध्यातृध्येयध्यानहीनो निर्मलः शान्तवासनः ।। ३३

बभूवावातदीपाभो बलिः प्राप्तमहापदः ।

उपशान्तमनास्तत्र रत्नवातायने बलिः ।

अवसद्बहुकालं स समुत्कीर्ण इवोपले ।। ३४

प्रशमितैषणया परिपूर्णया

मननदोषदशोज्झितयैतया ।

बलिरराजत निर्मलसत्तया

विघनमच्छतयेव शरन्नभः ।। ३५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देवदूतोक्ते मो० उपशमप्रकरणे बलिविश्रान्तिर्नाम सप्तविंशः सर्गः ।।

२७ ।।